पोलकः-लिका, पुपोलयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि तोलयतिवत् (757) ज्ञेयानि । कर्तरि क्तप्रत्यये [A]पोलितम् इति ।

(1026) " पुष पुष्टौ " (I-भ्वादिः-700. अक. सेट्. पर.)

' धारणे पोषयेत्, पुष्टौ पुष्येत् पुष्णाति पोषति । (श्लो. 171) इति देवः ।

पोषकः-षिका, पोषकः-षिका, [1]पुपोषिषकः-पुपुषिषकः-षिका, पोपुषकः-षिका ;
पोषिता-त्री, पोषयिता-त्री, पुपोषिषिता-पुपुषिषिता-त्री, पोपुषिता-त्री ;
[B]प्रपोषन्-न्ती, पोषयन्-न्ती, पुपोषिषन्-न्ती, पुपुषिषन्-न्ती ; —
पोषिष्यन्-न्ती-ती, पोषयिष्यन्, पुपोषिषिष्यन्-पुपुषिषिष्यन्-न्ती-ती ; —
— पोषयमाणः, पोषयिष्यमाणः, — पोपुष्यमाणः, पोपुषिष्यमाणः ;
प्रपुट्-प्रपुड्-पुषौ-पुषः ; — — —
[2]पोषितम्-पुषितम्-तः, पोषितः, पुपोषिषितः-पुपुषिषितः-पोपुषितः-तवान् ;
पुषः, [3]पोषणः, [4]प्रपोषी-धनपोषी, पोषः, पुपोषिषुः-पुपुषिषुः, पोपुषः ;
पोषितव्यम्, पोषयितव्यम्, पुपोषिषितव्यम्-पुपुषिषितव्यम्, पोपुषितव्यम् ;
पोषणीयम्, पोषणीयम्, पुपोषिषणीयम्-पुपुषिषणीयम्, पोपुषणीयम् ;
पोष्यम्, पोष्यम्, पुपोषिष्यम्-पुपुषिष्यम्, पोपुष्यम् ;
ईषत्पोषः-दुष्पोषः-सुपोषः ; — —
पुष्यमाणः, पोष्यमाणः, पुपोषिष्यमाणः-पुपुषिष्यमाणः, पोपुष्यमाणः ;
पोषः, पोषः, पुपोषिषः-पुपुषिषः, पोपुषः ;

---

1. ' रलो व्युपधाद्धलादेः संश्च ' (1-2-26) इति सन्नन्ते सर्वत्र कित्त्वविकल्पः । तेन रूपद्वयं बोध्यम् । एवं शुद्धात् क्त्वायामपि ज्ञेयम् ।
2. निष्ठायाम्, ' उदुपधाद् भावादिकर्मणोरन्यतरस्याम् ' (1-2-21) इति कित्त्वविकल्पः । तेन रूपद्वयम् ।
3. नन्द्यादित्वात् कर्तरि ल्युप्रत्यये ऽनादेशे च रूपम् ।
4. ताच्छीलिके णिनिप्रत्यये गुणे च रूपम् ।

A. ' संदोलयन् अधिकपोलितमद्रिराजं
संचोलितं सुबहुमूलितशाखिबृन्दैः ॥' धा. का. 3.21.

B. ' वेवैर्मेव्यतमैः प्रपोषद्शुभप्रश्रेषिभिः श्लेषति प्रोष्यान् .... .... ।' धा.का. 1.88.

C. ' स्वपोषमपुषद् युष्मान् या पक्षिमृगशावकाः ।' भ. का. 6. 26.